shuchiparyAvaraNam

शुचिपर्यावरणम्

Document Information

Text title : shuchiparyAvaraNam

File name : shuchiparyAvaraNam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Description/comments : NCERT Books 10th Standard shemuShI.

Acknowledge-Permission: Sanskrit Promotion Foundation https://www.samskritpromotion.in

Latest update : September 7, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 7, 2020

sanskritdocuments.org

शुचिपर्यावरणम्

दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम् ।
शुचिपर्यावरणम् ॥ ध्रु.॥

महानगरमध्ये चलदनिशं कालायसचक्रम् ।
मनः शोषयत् तनुः पेषयद् भ्रमति सदा वक्रम् ॥

दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम् ॥ १॥ शुचिपर्यावरणम्

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।
वाष्पयानमाला संधावति वितरन्ती ध्वानम् ।
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम् ॥ २॥ शुचिपर्यावरणम्

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम् ।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम् ।
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम् ॥ ३॥ शुचिपर्यावरणम्

कञ्चित् कालं नय मामस्मान्नगराद् बहुदरम्।
प्रपश्यामि ग्रामान्ते निर्झर-नदी-पयःपूरम् ।
एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम् ॥ ४॥ शुचिपर्यावरणम्

हरिततरूणां ललितलतानां माला रमणीया ।
कुसमावलिः समीरचालिता स्यान्मे वरणीया ।
नवमालिका रसालं मिलिता रुचिरं सङ्गमनम् ॥ ५॥ शुचिपर्यावरणम्

अयि चल बन्धो ! खगकुलकलरव गुञ्जितवनदेशम्।
परकलरव सम्भ्रमितजनेभ्यो धृतसखसन्देशम् ॥

चाकचिक्यजालं नो कर्याज्जीवितरसहरणम् ॥ ६॥ शुचिपर्यावरणम्

प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टाः ।
पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा ।

मानवाय जीवनं कामये नो जीवन्मरणम् ॥ ७॥ शुचिपर्यावरणम्

दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम् ।
शुचि पर्यावरणम् ॥

---

shuchiparyAvaraNam

pdf was typeset on September 7, 2020

Please send corrections to *sanskrit@cheerful.com*